International Journal of Sanskrit Research 2019; 5(1): 94-99

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(1): 94-99
© 2019 IJSR
www.anantaajournal.com
Received: 10-01-2019
Accepted: 16-02-2019

**डॉ. हरीश कुमार वर्मा**
व्याख्याता, राजकीय आचार्य संस्कृत महाविद्यालय, कोटकासिम, अलवर, राजस्थान, भारत

**Correspondence**
**डॉ. हरीश कुमार वर्मा**
व्याख्याता, राजकीय आचार्य संस्कृत महाविद्यालय, कोटकासिम, अलवर, राजस्थान, भारत

# भर्तृहरिपतञ्जल्योः शब्दार्थसम्बन्धयोः विश्लेषणम्

**डॉ. हरीश कुमार वर्मा**

**DOI:** https://doi.org/10.22271/23947519.2019.v5.i1a.1936

**सारांश**
व्याकरणशास्त्रीयदार्शनिकग्रन्थेषु शब्दस्य यत्स्वरूपमुपवर्णितं वर्तते तत् प्राधान्येन ध्वन्यात्मकं स्फोटात्मकञ्चेति द्विधैव परिगण्यते। तत्र श्रोत्रेन्द्रियेण यो गृह्यते स ध्वन्यात्मकः शब्दः प्रथमः। अयं ध्वनिरेव **शब्दशब्देन** व्यवह्रियते लोके । अत एव महर्षिणा पतञ्जलिना स्पष्टमुक्तं यत् 'प्रतीतपदार्थको लोके ध्वनिः "शब्द" इत्युच्यते। तद्यथा "शब्दं कुरु" "मा शब्दं कार्षीः " "शब्दकार्ययं माणवकः" इति ध्वनिं कुर्वन्नेवमुच्यते तस्माद् ध्वनिः शब्दः' इति।[1]
स्फोटरूपश्चेतनो नित्यो विभुश्च ध्वनिनाऽभिव्यज्यमानः शब्दो द्वितीयः। स्फुट्यते ध्वनिनाऽभिव्यज्यते यः सः स्फोटः। अत्र ध्वन्यात्मकः शब्दो व्यञ्जकः तथा स्फोटात्मकः शब्दो व्यङ्ग्यः।
शब्दार्थयोः सम्बन्धसन्दर्भे महाभाष्यवाक्यपदीययोः कृत्स्नमालोडनं विधाय शब्दार्थसम्बन्धस्वरूपसमीक्षायामेत-देव वक्तुं शक्यते यत् पतञ्जलिमतेन शब्दार्थसम्बन्धः नित्यः स्वाभाविकश्चास्ति। एष सम्बन्धः अभेदाऽध्यासरूपः स्वीकृतः तथा शब्दार्थयोः सम्बन्धे लोक एव कारणमस्ति। द्वावपि शब्दार्थौ अभिन्नौ, अतः अभेदरूप एव सम्बन्धः स्वीकृतः।
भर्तृहरिणाऽपि महाभाष्यानुसारं शब्दार्थसम्बन्धविषयकं स्वीयं विवेचनं प्रस्तुतम् । एष आचार्योऽपि शब्दार्थयोः सम्बन्धस्य नित्यतायामेव विश्वसिति। एतेन शब्दार्थसम्बन्धस्य अत्यन्तपरतन्त्रता स्पष्टमुक्ता। भर्तृहरिमते शब्दार्थसम्बन्धः शक्तिरूपः अनुमेयः, न तु साक्षात् प्रत्यक्षं निर्देष्टुं शक्यः। संयोगसमवायौ शब्दार्थयोः सम्बन्धौ नैव भवितुमर्हतः, अतस्तयोः निरासः कृतः। षष्ठीविभक्तिरूपकार्याद् शब्दार्थसम्बन्धः विज्ञातो भवति। उपकार्योपकारकरूपः सच सम्बन्धः भर्तृहरिणा योग्यतारूपः कार्यकारणरूपश्च द्विधोक्तः। सङ्केतश्च पुनः नास्ति सम्बन्ध इति भर्तृहरेरभिप्रायः।

**कूटशब्दः** अत्यन्तप्रासङ्गिकोऽयं शब्दार्थसम्बन्धयोः विश्लेषणम्

## प्रस्तावना
व्याकरणशास्त्रीयदार्शनिकग्रन्थेषु शब्दस्य यत्स्वरूपमुपवर्णितं वर्तते तत् प्राधान्येन ध्वन्यात्मकं स्फोटात्मकञ्चेति द्विधैव परिगण्यते। तत्र श्रोत्रेन्द्रियेण यो गृह्यते स ध्वन्यात्मकः शब्दः प्रथमः। अयं ध्वनिरेव **शब्दशब्देन** व्यवह्रियते लोके । अत एव महर्षिणा पतञ्जलिना स्पष्टमुक्तं यत् 'प्रतीतपदार्थको लोके ध्वनिः "शब्द" इत्युच्यते। तद्यथा "शब्दं कुरु" "मा शब्दं कार्षीः " "शब्दकार्ययं माणवकः" इति ध्वनिं कुर्वन्नेवमुच्यते तस्माद् ध्वनिः शब्दः' इति।
स्फोटरूपश्चेतनो नित्यो विभुश्च ध्वनिनाऽभिव्यज्यमानः शब्दो द्वितीयः। स्फुट्यते ध्वनिनाऽभिव्यज्यते यः सः स्फोटः। अत्र ध्वन्यात्मकः शब्दो व्यञ्जकः तथा स्फोटात्मकः शब्दो व्यङ्ग्यः। अत्र स्फोटशब्दस्य करणव्युत्पत्तिः स्फुटत्यर्थो येनेति अवश्यं ज्ञातव्या।

अत एव महाभाष्ये पतञ्जलिरुवाच श्येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः' इति।[2] अत्र येनेति करणे तृतीया, येन प्रकाशितेन स्फोटेन सास्नादिमताम् अर्थानां ज्ञानं भवति सः स्फोटः शब्दः इत्युपर्युक्तभाष्यवाक्यस्य अभिप्रायः। तदेवमुपर्युक्तानुसारं शब्दस्य द्वैविध्यमत्रोल्लिखितमिदानीमर्थस्य द्वैविध्यं प्रतिपाद्यते-अर्थोऽपि द्विधा भवति, बाह्यार्थो बौद्धार्थश्च। तत्र द्रव्यगुणकर्मसामान्यादिभेदैः यो हि सप्तविधो न्यायवैशेषिकदार्शनिकैः प्रतिपाद्यते स बाह्यार्थः। लोकव्यवहारो बाह्यार्थमेवाश्रित्य जायते। येषां घटपटमठादीनां सत्ता बाह्यजगति स्पष्टतया विद्यते। तेऽत्र बाह्यार्थत्वेन संगृह्यन्ते। लोके शास्त्रे च व्यवहारः शब्दप्रयोगश्च बाह्यार्थमादाय एव प्रवर्तते। घटमानय, गांनय, इत्यादिवाक्येषु बाह्यपदार्थस्यैव बोधः संभवतिए नत्वत्र बुद्धौ समाविष्टस्य कस्यचित् पदार्थविशेषस्य अवगतिः संभवति।

अत एव महर्षिपतञ्जलिरुवाच- 'लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमः' इति[3]। अतः शास्त्रमपि लौकिकार्थानुसारमेव बाह्यार्थमादाय प्रवर्तते। अत एव महाभाष्यकारेण पतञ्जलिना पुनरभिहितम् 'इह हि व्याकरणे ये चैते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते, इति।[4] अतो लोकप्रयुक्तार्थव्यवहारमादाय शाब्दिकैरर्थस्वरूपं निर्धार्यते। लोके तु बाह्यार्थेनैव गतिर्भवति। अतो नागेशभट्टेनापि स्पष्टमुक्तम् –

**लोक्यते येन शब्दार्थो लोकास्तेन स उच्यते।**
**व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा।।[5]**

यश्च पुनः बाह्यजगति नोपलभ्यतेए बाह्यसत्ताविरहितः केवलं बुद्ध्या प्रकल्पितः, बुद्ध्युपारूढो भवति स बौद्धार्थः। शशशृङ्गवन्ध्यापुत्रखपुष्पादिसदृशाः अर्थः बौद्धार्थाः सन्ति। एतेषां बाह्यजगति अविद्यमानत्वात् बौद्धः काल्पनिको वा व्यवहारो भवति। वस्तुतस्तु शशशृङ्गादयो बहवोऽर्थाः एतादृशाः सन्ति येषामुपलब्धिः कुत्रापि न दृश्यते देव भूत-पिशाच-राक्षस-किन्नर-पितरादयः अर्थाः स्वप्नवत् कल्पनाप्रसूताः भवन्ति। एतेषां बाह्यार्थत्वाभावात् अर्थवत्त्वं न स्यात्, अर्थवत्त्वाऽभावे प्रातिपदिकत्वं न स्यात्, अतः बौद्धार्थः वैयाकरणैः स्वीक्रियते कल्प्यते च।
यद्यपि बुद्धेः सर्वव्यवहारहेतुत्वात् बाह्यार्थो यदा बुद्धिविषयतां याति तदा सर्वोऽपि बाह्यार्थो बौद्धो भवति, अतः बाह्यो बौद्धश्च उभयविधोऽर्थः बौद्ध एव भवति। उभयोर्मध्ये नास्ति कश्चन भेदस्तथापि बौद्धसत्तां बाह्यसत्ताञ्चादाय अर्थस्य द्वैविध्यमत्र प्रदर्शितम्। श्रीमन्नागेशभट्टस्तु व्यवहारयोग्यः सर्वोऽप्यर्थः बौद्ध एवेत्याह- 'वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि बौद्धं तयोरभेदः न च बौद्धे दाहादिशक्तिमत्वम्' इति।[6] तथा 'अर्थश्च बौद्ध एव ज्ञानविषयः शक्तिग्रहविषयश्च। ज्ञानं वृत्तिरूपं बुद्धिधर्म एवे'ति च।[7] अर्थशब्दव्युत्पत्तिस्तु-अर्थ्यते याच्यते इति अर्थः। अर्थ याच्ञायामित्यतः कर्मणि घञ्प्रत्ययः। अथवा अर्थ्यते ज्ञायते हेयत्वेन उपेक्षणीयत्वेन वा इति अर्थः। 'ऋ गतौ' इत्यस्मादौणादिकः थन्प्रत्ययः कर्मणि ।
शब्दार्थयोः सम्बन्धसन्दर्भे आदौ भर्तृहरिमतमालोड्यते- शब्दार्थसम्बन्धविषये भर्तृहरिणा वाक्यपदीये इदमुक्तं यत् कश्चिदपि यदा शब्दमुच्चारयति तदा तत्र तत्त्वत्रयस्य प्रतीतिर्भवति।

1. शब्दस्वरूपावगतिः- गोशब्दस्य प्रयोगे 'ग्-ओ' इति आनुपूर्व्यात्मकस्य वर्णसमुदायरूपशब्दस्वरूपस्य बोधो भवति।
2. बाह्यार्थावबोधः- 'गौः' इति शब्दोच्चारणानन्तरं यथा गो शब्दात् 'गाय' इति नामकस्य बाह्यजगति वर्तमानस्य पशुविशेषरूपार्थस्य बोधो भवति।
3. वक्तुरभिप्रायावबोधः- वक्त्रा गोशब्दोऽयं श्गायश् इति पशोः बोधाय उच्चारित इत्यपि ज्ञानं भवति। तदेवं शब्दस्वरूपस्य, बाह्यार्थस्य तथा वक्तुरभिप्रायस्य च बोधः शब्दप्रयोगाद् भवति। एतेषु त्रिषु परस्परं कश्चिद् वास्तविकः सम्बन्धो यावद् न भविष्यति न तावत् नियमितरूपेण तत्त्वत्रयस्य बोधो भवितुं शक्नोति। अत एव भर्तृहरिणा स्वीकृतमिदं यत् शब्दार्थयोः सम्बन्धः स्वाभाविकतया विद्यमानोऽस्ति। तथाहि-

**ज्ञानं प्रयोक्तुः बाह्योऽर्थः स्वरूपं च प्रतीयते ।**
**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः ।।[8]**

अयं च सम्बन्धः केनचित् पुरुषेण निर्धारितः आहोस्वित् सामयिकः अर्थात् सांकेतिको नास्ति अपितु स्वभावसिद्धोऽस्ति । शब्दे हि अर्थबोधनसामर्थ्यमनादिकालादस्ति।[9] शब्दस्वरूपोपलब्धिर्यदा भवति तदा तत्र बाह्यार्थरूपवस्तुबोधः अथवा शब्दार्थविषयकज्ञाने संशयः नियमितरूपेण अवश्यं भवति। अतः शब्दार्थविषये एष नियमः शब्देन सह अर्थस्य सम्बन्धं बोधयति । अत एव आह भर्तृहरिः-

**प्रतिपत्तिर्भवत्यर्थे ज्ञाने वा संशयः क्वचित् ।**
**स्वरूपेषूपलब्धेषु व्यभिचारो न दृश्यते।।[10]**

अस्य अर्थस्य अयं शब्दो वाचकस्तथाऽस्य शब्दस्यायमर्थो वाच्यः इति षष्ठीविभक्तिप्रयोगादिदं ज्ञातं भवति यत् शब्दार्थयोस्सम्बन्धः स्वाभाविकोऽस्ति। षष्ठीविभक्तेः प्रयोगः सम्बन्धमन्तरा न भवति। येषु वस्तुषु एतादृशः स्वाभाविकः सम्बन्धो न भवति तत्र वाच्यवाचकरूपसम्बन्धोऽपि न भवति। यथा-घटः, पटःए इति। अत आह भर्तृहरिः-

**अस्याऽयं वाचको वाच्य इति षष्ठ्या प्रतीयते ।**
**योगः शब्दार्थयोस्तत्त्वमित्यतो व्यपदिश्यते।।[11]**

अस्मात् स्वाभाविकसम्बन्धादेव शब्दार्थयोस्तादात्म्यव्यवहारो भवति। अत आह हेलाराजः श्अत एव च स्वाभाविकात् सम्बन्धाच्छब्दार्थयोः तत्त्वं गौरयमर्थः अभेदेन व्यवह्रियते' इति।[12]
अनेनेदं विज्ञातं भवति यत् सम्बन्धनामकः अस्ति कश्चित् पदार्थः। कस्तावत् सम्बन्धः तस्य स्वरूपञ्च किमिति जिज्ञासायां भर्तृहरिणा उक्तं यत् शब्दार्थयोर्मध्ये शब्दार्थाभ्यां भिन्ना सम्बन्धस्य काचित् स्वतन्त्रसत्ता नास्ति येनेदं वक्तुं शक्नुयात् यदिदं सम्बन्धस्वरूपम् अर्थात् शब्दार्थसम्बन्धस्य शब्दार्थाधीनत्वात् स्वतन्त्ररूपेण तस्य निर्देशो नैव भवितुमर्हति। तथाहि –

**नाभिधानं स्वधर्मेण सम्बन्धस्यास्ति वाचकम् ।**
**अत्यन्तपरतन्त्रत्वात् रूपं नास्योपदिश्यते।।[13]**

अस्य व्याख्यां कुर्वता हेलाराजेनोक्तं यत् श्नित्यपरतन्त्रो हि सम्बन्धः परोपाधिस्वरूपः सम्बन्धिनोः परस्परौन्मुख्यस्वभावः धर्ममात्रलक्षणः। ततो निष्कृष्य सम्बन्धशब्देन स्वप्रधानः सम्बन्धिरूपतया अभिधीयमानो न साक्षात् स्प्रष्टुं शक्यते' इति।[14] अर्थात् अनयोः अयं सम्बन्धः इत्येवं साक्षात् अवबोद्धुं कश्चिदपि न प्रभवति। नापि केनचित् पदेन संविज्ञातुं शक्यः सम्बन्धः । केवलं षष्ठीरूपकार्येण अनुमीयते। श्धर्मश् इत्युक्त्या सम्बन्धस्य सदा सम्बन्धिपराधीनत्वमभिव्यक्तं भवति। अतः सर्वत्रैव स सम्बन्धः धर्मः धर्मरूपतया, सम्बन्धिद्वयानुगतत्वेन ज्ञायते। अत आह भर्तृहरिः –

**उपकारात् स यत्रास्ति धर्मस्तत्राऽनुगम्यते ।**
**शक्तीनामप्यसौ शक्तिः गुणानामप्यसौ गुणः ।।[15]**

परस्परम् असम्बद्धानाम् उपकाराऽभावात् द्वयोः परस्परम् उपकार्योपकारकभावापन्नयोः सम्बन्धिनोः उपकारात् सम्बन्धः अनुमानाद् ज्ञायते न तु प्रत्यक्षरूपेणए यतः असम्बद्धेषु उपकारस्य सत्ता नैव स्थातुं शक्नोति । यत्र च उपकारकः सम्बन्धोऽस्ति तत्र शक्तिनामकधर्मस्य अनुमानं क्रियते । सम्बन्धोऽयमेव शक्तीनामपि शक्तिरस्ति। अर्थात् शक्त्या यत् कार्यं भवति तस्य नियामकः अपि सम्बन्ध एवास्ति। सम्बन्धश्चायं गुणानामपि गुणोऽस्ति। अर्थात् गुणानां द्रव्याश्रितत्वं सम्बन्धमन्तरा न सम्भवति। अतः सम्बन्ध एव गुणानामपि द्रव्याश्रितत्वव्यवस्थापकः इति नासौ गुणरूपोऽपि गुणानां गुणनियामकत्वाभावात्।
भर्तृहरिमते शब्दार्थयोर्मध्ये संयोगसमवायौ सम्बन्धौ न स्तः । सम्बन्धसमुद्देशे षट्संख्याक (6) कारिकातः आरभ्य अष्टविंशतिसंख्याक (28) कारिकां यावत् भर्तृहरिणा एतदेव निरूपितम्। तथाहि - भर्तृहरिमते सम्बन्धो धर्मरूपोऽस्ति । नित्यपरतन्त्रता एव सम्बन्धस्य लाक्षणिको धर्मः। सम्बन्धस्य नित्यपरतन्त्रतामादाय

एव संयोगसमवाययोः सम्बन्धत्वखण्डनं भर्तृहरिणा कृतम्। भर्तृहरेः कथनमस्ति यत् संयोगसमवायौ सम्बन्धौ न, अपितु सम्बन्धधर्माणौ स्तः। यतः सम्बन्धस्य पारतन्त्र्यधर्मः संयोगे तथा समवायेऽपि दृश्यते। एतावपि द्रव्यगुणादिषु परतन्त्रभावेन स्थितौ स्तः। एतत्परतन्त्रतासामान्यादेव एतौ सम्बन्धौ उच्येते। वस्तुतः एतौ सम्बन्धौ न स्तः, इति हेलाराजोऽप्याह- 'संयोगसमवायावेव नेह (शब्दार्थसम्बन्धप्रकरणे) सम्बन्धौ यथा अन्येषां दर्शनम्' इति।[16] संयोगस्य गुणान्तर्गतत्वात् समवायस्य च स्वतन्त्रपदार्थत्वेन स्वीकारात् एतौ संयोगसमवायौ स्वतन्त्रौ पदार्थौ स्तः। तदेवं पारतन्त्र्याभावात् संयागसमवायौ स्वतन्त्रघटपटाविव भवतः। सम्बन्धश्च पुनः नित्यपरतन्त्रो भवति, अत एव एतौ संयोगसमवायौ सम्बन्धौ न स्तः। यथाह भर्तृहरिः-

**पदार्थीकृत एवान्यैः सर्वत्राभ्युपगम्यते ।**
**सम्बन्धस्तेन शब्दार्थः प्रविभक्तुं न शक्यते।।**[17]

अर्थात् अन्यैः = न्यायवैशेषिकदार्शनिकैःए सर्वत्र = सर्वेषु पदार्थेषु पदार्थीकृतः = नित्यपारतन्त्र्येण शक्तिरूपोऽपदार्थोऽपि पदार्थत्वारोपात् पदार्थीकृतः । अभूततद्भावे च्विः। अत एव संयोगो गुणः, समवायश्च स्वतन्त्रः पदार्थः इति नैयायिकादयः। तेन पदार्थीकृतेन सम्बन्धेन संयोगेन समयायेन वा शब्दार्थः = अयम् अस्य शब्दस्य अर्थः, इत्येवं प्रविभक्तुम् = प्रविभागेण ज्ञातुम् अभ्युपगन्तुं वा न शक्यते।

न्यायवैशेषिकदर्शने शब्दार्थयोः सम्बन्धः संयोगो अस्मादपि कारणान्न भवति यतः न्यायवैशेषिकदर्शने शब्दः आकाशस्य गुणोऽस्ति। यस्य बोधः शब्दाद् भवति तत् साधारणतया द्रव्यं भवति। द्रव्यगुणयोः परस्परं संयोगसम्बन्धो भवितुमेव नार्हति। किञ्च एतेषां मते शब्दोऽपि गुणः, संयोगोऽपि गुणः, द्वयोः गुणयोः परस्परं संयोगसम्बन्धो भवितुमेव नार्हति। द्रव्ययोरेव संयोगः, अयुतसिद्धयोः एव समवायः। गुणाश्च पुनः द्रव्येषु भवन्ति न गुणेषु अपि, गुणानां गुणेष्वनङ्गीकारात्।

किञ्च न्यायवैशेषिकदर्शने शब्दः सर्वदा निष्क्रियः अर्थात् क्रियारहितोऽस्ति। संयोगस्य कृते एतदावश्यकं भवति यदुभयोः सम्बन्धिनोर्मध्ये एकस्मिन् तु क्रिया अवश्यं भवेदिति। आकाशोऽपि निष्क्रियः, शब्दोऽपि निष्क्रियः, तर्हि उभर्योमध्ये संयोगसम्बन्धः कथं भवितुमर्हति। अतः शब्दार्थयोर्मध्ये संयोगसम्बन्धः उत समवायसम्बन्धो नैवास्ति। यथा दण्डी (दण्डवाला) इत्यत्र दण्डेन सह संयोगसम्बन्धस्यए एकाक्षः (एक आंखवाला) इत्यत्र चक्षुषा सह समवायसम्बन्धस्य ज्ञानं भवति तथा शब्दार्थयोर्विषये घटः (घड़ा शब्द वाला), चक्षुः (चक्षु वाला व्यक्ति) इत्येवं प्रयोगो नैव भवितुमर्हति। अतः शब्दार्थयोर्नास्ति संयोगसम्बन्धो नापि समवायसम्बन्धः।

कस्तर्हि शब्दार्थयोः सम्बन्धः? इति जिज्ञासायामाचार्य भर्तृहरिः स्वाभिमतं प्रकटयन्नेवमाह-

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**
**अनादिरर्थः शब्दानां सम्बन्धो योग्यता तथा।।**[18]

अर्थात् यथा इन्द्रियाणां चक्षुरादीनां स्वविषयेषु रूपादिषु अनादिः योग्यतैव सम्बन्धः, तथा अर्थैः सह शब्दानामनादिः योग्यतैव सम्बन्ध इति।

शब्दार्थयोः प्रतिपाद्यप्रतिपादकभावनियामिका योग्यता एव सम्बन्धः। किम्बहुना, सर्वेषां सम्बन्धिनां ये केचन साक्षात् सम्बन्धाः संयोगसमवायादयः, ये च परम्परासम्बन्धाः कार्यकारणभाव-विषयविषयिभाव-प्रतियोग्यनुयोगिभाव-निरूप्यनिरूपकभाव-आधाराधेयभावादयः, तेषां सर्वेषामपि नियामिका सम्बन्धिनां परस्परयोग्यता एव। शब्दः सर्वदा उच्चारणमात्रेण श्रवणमात्रेण वा संयोग-समवायसम्बन्धापेक्षां विनैवार्थबोधं कारयति। इयमेव शब्दस्याकृत्रिमा स्वाभाविकी योग्यता शक्तिरस्ति । यथा चक्षुरादिषु रूपदर्शनशक्तिः कमपि पुरुषप्रयत्नविशेषं नापेक्षते तथा शब्दोऽपि अर्थबोधकतायै कमपि पुरुषप्रयत्नविशेषं नापेक्षते। प्रकाश्यप्रकाशकभावरूपयोग्यतया यथा इन्द्रियविषययोः सम्बन्धस्य ग्रहणं भवति एवं शब्दार्थयोः सम्बन्धज्ञानम् उभयोः प्रकाश्यप्रकाशकरूपयोग्यतातः भवति। अस्याः योग्यतायाः फलमिदमस्ति यत् चक्षुरिन्द्रियं रूपस्यैव ग्रहणं करोति एवं रसना रसस्यैव ग्रहणं यथा करोति तथैव प्रत्येकशब्दः अपि प्रत्येकार्थस्य बोधं कारयित्वा तत्तद्विशेषशब्दाः तत्तद्विशेषार्थान् एव बोधयन्ति। येषु अर्थेषु नियमितरूपेण ये शब्दाः प्रसिद्धाः सन्ति, तेषामर्थानामेव तेते शब्दाः नियमितरूपेण बोधं कारयन्ति।

कथनस्य तात्पर्यमिदमस्ति यत् 'गौरश्वः' इत्यादिशब्दाः अनादिपरम्परातः समायाताः विद्यन्ते, तथा एते स्वाभाविकयोग्यतया स्वनिश्चितार्थानां बोधं कारयन्ति। गौरिति शब्दादश्वस्य बोधो नैव भवितुमर्हतिए नापि अश्वशब्दाद् गोर्बोधो भवति। सम्बन्धशब्देन यस्य सम्बन्धस्य बोधः क्रियते स योग्यतारूपः सम्बन्धः एवास्ति। अस्य योग्यतासम्बन्धस्य ज्ञानं शब्दस्य अर्थबोधकयोग्यतया एव भवति। तथाहि-

**सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता ।**
**समयाद् योग्यतासंविन्मातापुत्रादियोगवत् ।।**[19]

अर्थात् सम्बन्धशब्दः स्वार्थं योग्यतालक्षणं सम्बन्धं योग्यतयैव सम्बन्धेन प्रतिपादयति। योग्यताशब्दस्य स्वार्थप्रतिपादने स्वार्थेन सह अनादिसिद्धा योग्यता एव सम्बन्धः।

यदि शब्दार्थयोरयं योग्यतासम्बन्धोऽनादिः = स्वाभाविकस्तर्हि शब्दादर्थस्य ज्ञानं सर्वदा एव कथं न भवति ? इति जिज्ञासायां भर्तृहरिणा सम्यगुत्तरितं यत् ३समयाद् योग्यतासंविन्माता-पुत्रादियोगवत्' इति। अर्थात् योग्यतायाः ज्ञानं समयात् = संकेताद् भवति। यथा- मातापुत्रादीनां सम्बन्धज्ञानं संकेताद् भवति - इयम् अस्य माता, अयमस्याः पुत्रः इति। अनादिसिद्धा स्वाभाविकी योग्यता चेयम् अनादिसिद्धस्वार्थविषयकाभिधान-व्यवहारवतः शब्दस्य वृद्धव्यवहारपरम्परापरपर्य्यायात् संकेतात् निश्चीयते। संकेतेन विद्यमानसम्बन्धस्य निर्माणं न क्रियतेऽपितु पितापुत्रयोः विद्यमानस्य जन्यजनकभावसम्बन्धस्य एव बोधः कार्यते यदयमस्य जनकः, अयं चास्य पुत्र इति। अतः संकेतादेव सम्बन्धज्ञानम्ए तथा सम्बन्धज्ञानानन्तरमेव शब्दादर्थज्ञानं न तु सर्वदैव शब्दादर्थज्ञानमिति निष्कर्षतया वक्तुं शक्यते। अत्र संकेतो नास्ति सम्बन्धः इत्यपि सुस्पष्टं जातम्।

भर्तृहरिणा वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशे शब्दार्थयोः आदौ योग्यतासम्बन्धः प्रदर्शितः, एतदनन्तरं कार्यकारणसम्बन्धस्य स्वरूपं निदर्शितम्। अतोऽत्रालेखे आदौ योग्यतासम्बन्धं प्रदर्श्य कार्यकारणसम्बन्धस्य स्वरूपमुल्लिख्यते –

भर्तृहरिमते शब्दार्थौ परस्परं कार्यकारणे स्तः। शब्दसाधनेन एव वक्ता स्वाभिप्रेतार्थं श्रोतारं प्रति प्रेषयति। अतः शब्दः अर्थस्य कारणमित्युच्यते । अस्येदमेव तात्पर्य यत् श्रोतुः बुद्धौ यः अर्थः (वस्तु) विद्यमानोऽस्ति तस्य कारणं शब्दः। शब्दात् श्रोतुः बुद्धिगतोऽर्थः अभिव्यक्तो भवति। बुद्धौ पूर्वस्माद् विद्यमानादर्थादेव शब्दस्य ज्ञानं भवति। अतः अर्थः शब्दस्य कारणं भवति। यतः अर्थस्य बुद्धौ पूर्वोपस्थितिरिव शब्दस्य ज्ञानं कारयति। अत एवोक्तं भर्तृहरिणा-

**शब्दः कारणमर्थस्य स हि तेनोपजन्यते ।**
**तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते।।**[20]

अर्थात् ताल्वादिस्थानकरणैः वक्त्रा अभिव्यञ्जितः, श्रोतुः कर्णमुपगतः, श्रोतृबुद्ध्युपारूढः शब्दः अन्वयव्यतिरेकाभ्यां सामानाधिकरण्येन च श्रोतृबुद्ध्युपारूढस्य अर्थस्य कारणम्। तथा च शब्दस्य प्रयोगात् प्राग् विवक्षादशायां संकल्परूपेण बुद्धिविषयात् शब्दस्योपादानकारणात् अर्थाज्जनितः ताल्वादिस्थानकरणाभिघातरूपः शब्दः कार्यम् । इत्येवं शब्दार्थयोः द्वयोरपि परस्परं प्रति कार्यत्वं कारणत्वञ्च सिध्यति। अनया रीत्या शब्दार्थयोरभेदेन

तादात्म्याध्यासलक्षणः शब्दार्थयोः सम्बन्धः प्रतिपादितो भवति। तत्तच्छब्दतत्तदर्थवासनाशून्यानां तु तत्तच्छब्दात् न तत्तदर्थावबोधः, अत एव संस्कृतभाषातः संस्कृतभाषेतरभाषामात्रविदां न बोधः। अत एव हेलाराजेन स्पष्टमुक्तं यत् अर्थो वक्तुः बुद्धौ स्थितो भवति। वक्ता तं बुद्धिगतम् अर्थमुच्चारणद्वारा श्रोतारं समर्पयतिए तथा श्रोताऽपि तथैव स्वभावनया युक्तो भवति, एवं स्वस्वाभाविकवासनया तं गृह्णाति। शब्दग्रहणाच्च तस्य शब्दविषयकसंस्काराः उद्बुद्धाः भवन्ति। तदनुसारं सः व्यवहारे प्रवृत्तो भवति।[21]

तदेवं स्वमतानुसारं भर्तृहरिणा वाक्यपदीये शब्दार्थसम्बन्धोऽयं योग्यतारूपः कार्यकारणरूपश्चेति द्विधा प्रतिपादितः। अनयोरुभयोर्मध्ये कः भेदः इति जिज्ञासायामुच्यते यत् योग्यतालक्षणः सम्बन्धः प्रकाश्यप्रकाशकभोवन इन्द्रियार्थविषयवत् शब्दार्थयोर्मध्ये स्थितो भवति। सम्बन्धेनानेन शब्दे प्रकाशकत्वम् अर्थे प्रकाश्यत्वञ्च निश्चीयते। अर्थप्रकाशनसामर्थ्यमर्थबोधकता शक्तिर्वा अत्र योग्यता। अत एव योग्यतासम्बन्धोऽयं वाच्यवाचकभावापरपर्य्यायशक्तिरूपः नित्यश्चास्ति। सम्बन्धोऽयं एतस्मिन्नर्थे अयं शब्दः साधुः इति ज्ञाने सति, शास्त्रप्रक्रियास्मरणपूर्वके साधुशब्दप्रयोगे सति वा जायमानायां धर्माभिव्यक्तौ अङ्गत्वं प्रतिपद्यते।

कार्यकारणलक्षणो द्वितीयसम्बन्धस्तु इतरेतराध्यासमूलकतादात्म्य-रूपः । 'योऽर्थः स शब्दः, यः शब्दः सोऽर्थ' इत्येवमितरेतरयोः = परस्परयोः शब्दार्थयोः सम्बन्धिनोर्यः अध्यासः = इतरस्मिन्नितरस्य आरोपः अवभासो वा, एतन्मूलकं भवति तादात्म्यम्। अतः अभेदसम्बन्धमूलकः कार्यकारणभाव:, न तु भूमाग्न्योः कार्यकारणभाववत्। अत्र शब्दो यथा अर्थस्य निमित्तं तथा अर्थः शब्दस्य निमित्तम्, अर्थात् अर्थाकारबुद्धितः शब्दाकारबुद्धिरुत्पद्यते, एवं बुद्धिविषययोर्तादात्म्यादर्थः कारणम्, शब्दः कार्यमिति कार्यकारणभावसम्बन्धः निश्चीयते। अत्रोभयविधसम्बन्धयोर्मध्ये योग्यतासम्बन्धः शक्तिनियामकः, तथा कार्यकारणसम्बन्धः अभेदाध्यासनियामकः इत्येवम् उभयोर्मध्ये भेदो ज्ञातुं शक्यते।

इदानीं सम्बन्धविषये महाभाष्यकारमतमालोडयामः। शब्दार्थयोः सम्बन्धः पतञ्जलिमते कीदृशोऽस्ति? तथा तस्य स्वरूपं किम्? इत्येतदत्र चिन्त्यते। महाभाष्यकृत्पतञ्जलिमते शब्दः, अर्थः उभयोरेतयोः सम्बन्धश्च नित्योऽस्ति। तथाहि 'सिद्धे शब्दे अर्थसम्बन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः" इति।[22] अस्य प्रदीपव्याख्यायां कैयटेनापि स्पष्टीकृतमस्ति यत् शब्दस्य अर्थेन सह सम्बन्धस्य नित्यतायाः किं तात्पर्यम्? शब्दे अर्थप्रत्यायिका योग्यता नाम्नी शक्ति स्वाभाविकी विद्यते। शब्दे स्वाभाविकी योग्यता चेयमस्ति यत् यदा शब्दः उच्चारितो भवति तदा सः अर्थमुपस्थापयत्येव। द्रव्यरूपार्थस्यानित्यत्वेऽपि सम्बन्धो नित्य एवाऽस्ति। यतः अर्थबोधनस्य योग्यता शब्दे निहिता अस्ति। शब्दश्च नित्योऽस्ति। यथोक्तम् 'अनित्ये अर्थे कथं सम्बन्धस्य नित्यतेति चेद् योग्यतालक्षणत्वात् सम्बन्धस्यए तस्याश्च शब्दाश्रयत्वात्, शब्दस्य च नित्यत्वात्'।[23] तथा बुद्धिप्रतिभासः शब्दार्थो यदा यदा शब्द उच्चारितस्तदा तदाऽर्थाकारा बुद्धिरुपजायते इति प्रवाहनित्यत्वादर्थस्य नित्यत्वम्'[24] इति च। पतञ्जलिमते शब्दार्थयोः सम्बन्धः स्वाभाविकोऽस्तीति दध्वन्यते। यतोहि पाणिनिना 'चार्थे द्वन्द्व:'[25] 'अनेकमन्यपदार्थे'[26] इत्यादिभिः सूत्रैर्यदा शब्दानामर्थस्य अनुशासनं स्वयमेव कृतं तर्हि कथं शब्देभ्योऽर्थाभिधानं स्वाभाविकमिति जिज्ञासायाः समाधाने भाष्यकारेण प्रतिपादितं यत् नैतदर्थानामादेशनमस्तिए अपितु एते शब्दाः स्वभावतः तत्तदर्थेभ्यः सम्बद्धाः सन्ति। पाणिनेरेतदर्थानुशासनं तस्य शब्दार्थयोः स्वाभाविक सम्बन्धस्य ग्राहकत्वात् निमित्तमात्रमस्ति। तथाहि – 'किं स्वाभाविकं शब्दैरर्थाभिधानम् आहोस्वित् वाचनिकम् ? स्वाभाविकमर्थानादेशनात्। न ह्यर्थाः आदिश्यन्ते, कथं पुनरर्थान्नादिशन्नेवं ब्रूयात्- अर्था नादिश्यन्ते इति, यदाह भगवान् चार्थे द्वन्द्वः, अपत्ये, रक्ते, निर्वृत्ते इति? नैतान्यर्थदेशनानि। स्वभावतः एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते'[27] इति।

भगवता पाणिनिना शब्दानामर्थस्य आदेशनं कथं न कृतम्? इति प्रश्नोत्तरे महर्षिणा पतञ्जलिना अनवस्थादोषः उत्पादितः। यतः शब्दानामर्थस्य आदेशनम् आवश्यकरूपेण शब्दैरेव कर्तुं शक्यते न तु केनचित् सूत्रेण, नापि प्रत्यक्षानुमानप्रमाणाभ्याम्। तर्हि अर्थनिर्देशकशब्दस्य अर्थनिर्देशः केन शब्देन करिष्यते? भूयः तच्छब्दस्यापि केन शब्देन निर्देशः क्रियते? तदेवम् अर्थनिर्देशने अनवस्थादोषः समायाति। कश्चिदपि एतादृशो नास्ति यः शब्दानाम् अर्थनिर्देशनं कर्तुं शक्नुयात्। तथाहि- 'किं पुनः कारणम् अर्थाः नादिश्यन्ते? तच्च लघ्वर्थं ह्यर्थाः नादिश्यन्ते। अवश्यं ह्यनेनार्थानादिशता केनचिच्छब्देन अर्थनिर्देशः कर्तव्यः स्यात्। तस्य च तावत् केन कृतो येनाऽसौ क्रियते? अथ तस्य केन कृतः? तस्य केन कृतः ? तस्य केन कृत? इत्यनवस्था स्यात्। असम्भवश्च। असम्भवः खल्वप्यर्थादेशिनस्य। को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्'[28] इति। तस्मात् शब्दार्थयोः सम्बन्धः स्वाभाविक एव मन्तव्य इति भाष्यकारस्य अभिप्रायः।

भाष्यकारमतेन शब्दार्थयोर्मध्ये अभेदाऽध्यासरूपसम्बन्धोऽप्यस्ति। 'अथ गौरित्यत्र कः शब्दः' इति प्रश्नमुद्भाव्य द्रव्यगुणकर्मसामान्येषु अपि शब्दत्वस्य या सम्भावना उद्भाविता सा शब्दार्थयोरभेदाध्यासे एव सम्भवति।

'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रभाष्ये भाष्यकारेण स्पष्टमुक्तं यत् अत्र सूत्रे रूपग्रहणं विनाऽपि स्वशब्देन रूपमेव ग्रहीष्यते। तथाहि 'एवं तर्हि सिद्धे सति यत् रूपग्रहणं करोतिए तज्ज्ञापयत्याचार्यः अस्त्यन्यद् रूपात् स्वं शब्दस्येति। किं पुनस्तत्द्द अर्थः'[29] इति। तदेवं पतञ्जलिमते शब्दार्थयोर्मध्ये अभेदाऽध्यास-रूपोऽपि सम्बन्धः अस्ति।

शब्दार्थसम्बन्धस्य कारणं लोक एवाऽस्ति इति पतञ्जलिना स्पष्टमुक्तम्। तथाहि - 'कथं ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति? लोकतःए यल्लोके अर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्याः भावाः, निर्वृत्तौ तावत् तेषां यत्नः क्रियते। तद्यथा- घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्त्वाह- कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्त्वाह- कुरु शब्दान् प्रयोक्ष्य इति। तावत्येवार्थमुपादाय शब्दान् प्रयुञ्जते'[30] इति। अनेन पतञ्जलिकथनेनेदं सिद्ध्यति यत् शब्दार्थयोः सम्बन्धस्य कारणं लोक एवास्ति। यदि शब्दार्थयोर्मध्ये कश्चित् सम्बन्धो न स्यात् तर्हि लोकव्यवहार एव भवितुं नार्हति। घटशब्दकथने सति यदि शब्दस्य वस्तुना सह सम्बन्धो न स्यात् तर्हि घटवस्तुनो ज्ञानमपि नैव भवितुं शक्नोति। अत एव कैयटेन स्पष्टमुक्तं यत् वृद्धव्यवहारात् शब्दार्थयोः मध्ये सम्बन्धस्य ज्ञानं भवति। तथाहि - 'तस्माद् वृद्धव्यवहारादेव शब्दार्थसम्बन्धव्युत्पत्तिः'[31] इति। स च सम्बन्धः नित्यः अस्ति इति कैयटः स्पष्ट माह-'सम्बन्धस्यापि व्यवहारपरम्परया अनादित्वान्नित्यता'[32] इति। पतञ्जलिमते शब्दः अर्थादभिन्न अस्ति। अर्थात् शब्दादर्थः पृथग् नास्ति। शब्दार्थावभिन्नावेव स्तः। अर्थः शब्दस्यैवान्तरङ्गशक्तिरूप:, अत एव शब्दः शब्दाद् बहिर्भूतः किन्तु अर्थोऽबहिर्भूतः। अर्थात् अपृथगस्ति यथाह पतञ्जलिः – शब्दश्च शब्दाद् बहिर्भूतः, अर्थोऽबहिर्भूतः'[33] इति। एतेनेदं सिद्धं भवति यत् महाभाष्यकारः शब्दार्थयोः मध्ये अभेदनामकं सम्बन्धं स्वीचकार। अत एव महाभाष्यकारः प्रोवाच- 'शब्देनोच्चारितेनार्थो गम्यते। गामानय, दध्यशानेति अर्थः आनीयतेए अर्थश्च भुज्यते' इति। शब्दार्थयोरभेदसम्बन्धस्वीकारे एव उपर्युक्तभाष्यं संगच्छते।

## संदर्भ ग्रंथ सूची


1. पस्पशाह्निकम्, पृ.14, महाभाष्यम्, प्रथमसंस्करणम्-1938, पुनर्मुद्रणम्-1999
2. पस्पशाह्निकम्, महाभाष्यम्
3. पस्पशाह्निकम्, महाभाष्यम्

4. महाभाष्यम्, कारके (1-4-23)
5. नागेशभट्टः, महाभाष्यप्रदीपोद्द्योते (4-1-3)
6. शक्तिनिरूपणम्, वैयाकरणसिद्धान्तलघुमञ्जूषा, सटिप्पणरत्नप्रभाव्याख्योपेता, पृ. सं. 38, चतुर्थसंस्करण, विक्रम सं. 2063
7. बौद्धार्थनिरूपणम्, वै.सि.ल.मञ्जूषा, पृष्ठ सं. 364, चतुर्थ संस्करणए वि.सं. 2063
8. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका 01
9. ष्प्रयोगेणाभिज्वलितैः शब्दैस्त्रितयमवगम्यते। आत्मीयं स्वरूपम्, अर्थश्च फलसाधनः, प्रयोक्तुरभिप्रायश्च । न चैतदसति सम्बन्धे नियमेन घटत इतिए वास्तवः सम्बन्धावसायो न सामयिकः शब्दार्थयोः सम्बन्धोऽभिधानिय-मनादनादेः। अत समवस्थित इत्याह। स्वभाव एव निरूढो न तु पुरुषेण निवेशितः' इति हेलाराजः।- वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका 01
10. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका–02
11. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-03
12. प्रकाशव्याख्या, वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-03
13. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-04
14. प्रकाशव्याख्या, वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-04
15. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-05
16. प्रकाशव्याख्या,वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-12
17. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-12
18. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-29
19. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-31
20. वाक्यपदीयपदकाण्डसम्बन्धसमुद्देशः, कारिका-32
21. श्प्रतिपाद्यप्रतिपादकयोर्हि परस्पराभिप्रायसङ्क्रान्तिर्व्यवहार इत्यन्तः स्थितमर्थं मूलावस्थामाप्य परित्यक्तं वक्तृबुद्धिसमाविष्टं श्रोतर्यर्पयति शब्दः। श्रोतापि च तथैव स्ववासनाविकासानुसारेण प्रतिपद्यते समाविष्टशब्दभावनः।' इति हेलाराजः, प्रकाशव्याख्या, वाक्यपदीयपदकाण्डसम्बन्ध-समुद्देशः, कारिका-32
22. महाभाष्यम् (पस्पशाह्निकम्), पृ. 52, प्रथमसंस्करणम्-1938 पुनर्मुद्रणम्- 1999
23. प्रदीपः, पस्पशाह्निकमहाभाष्यम्, पृ. 52, प्रथमसंस्करणम्-1938 पुनर्मुद्रणम्- 1999
24. प्रदीपः, पस्पशाह्निकमहाभाष्यम्, पृ. 52, प्रथमसंस्करणम्-1938 पुनर्मुद्रणम्- 1999
25. अष्टाध्यायी, 2-2-29
26. अष्टाध्यायी, 2-2-24
27. महाभाष्यम्-2-1-1
28. महाभाष्यम् 2-1-1
29. महाभाष्यम् 1-1-67
30. महाभाष्यम् (पस्पशाह्निकम्)
31. कैयटः, प्रदीपव्याख्या, महाभाष्यम् 2-1-1
32. कैयटः, प्रदीपव्याख्याए महाभाष्यम्, पस्पशाह्निकम् पृ. 47, संस्करणम्-1999, प्रतिभाप्रकाशनम्
33. महाभाष्यम्, 1-1-66, पू.सं. 510, संस्करणम्-1999, प्रतिभाप्रकाशनम्